# Bhagavat Sharanastotram

# ભગવચ્છરણસ્તોત્રમ્

## Document Information

Text title : bhagavachCharaNastotram

File name : bhagavachCharaNastotram.itx

Category : misc, stotra, vedanta, brahmAnanda

Location : doc_z_misc_general

Author : mauktikarAmodAsInashiShyabrahmAnanda

Proofread by : PSA Easwaran

Latest update : June 13, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# ભગવચ્છરણસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

(અનુષ્ટુપ્ વૃત્તમ્ -)
સચ્ચિદાનન્દરૂપાય ભક્તાનુગ્રહકારિણે ।
માયાનિર્મિતવિશ્વાય મહેશાય નમો નમઃ ॥ ૧॥

(વસન્તતિલકા વૃત્તમ્ -)
રોગા હરન્તિ સતતં પ્રબલાઃ શરીરં કામાદયોઽપ્યનુદિનં પ્રદહન્તિ ચિત્તમ્ ।
મૃત્યુશ્ચ નૃત્યતિ સદા કલયન્ દિનાનિ તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૨॥

દેહો વિનશ્યતિ સદા પરિણામશીલશ્ચિત્તં ચ ખિદ્યતિ સદા વિષયાનુરાગિ ।
બુદ્ધિઃ સદા હિ રમતે વિષયેષુ નાન્તસ્તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૩॥

આયુર્વિનશ્યતિ યથામઘટસ્થતોયં વિદ્યુત્પ્રભેવ ચપલા બત યૌવનશ્રીઃ ।
વૃદ્ધા પ્રધાવતિ યથા મૃગરાજપત્ની તસ્માત્ત્વમદ્ય શરણં મમ દીનબન્ધો ॥ ૪॥

આયાવ્યયો મમ ભવત્યધિકો વિનીતે કામાદયો હિ બલિનો નિબલાઃ શમાદ્યાઃ ।
મૃત્યુર્યદા તુદતિ માં બત કિં વદેયં તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૫॥

તપ્તં તપો ન હિ કદાપિ મયેહ તન્વા વાણ્યા તથા ન હિ કદાપિ તપશ્ચ તપ્તમ્ ।
મિથ્યાભિભાષણપરેણ ન માનસં હિ તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૬॥

સ્તબ્ધં મનો મમ સદા ન હિ યાતિ સૌમ્યં ચક્ષુશ્ચ મે ન તવ પશ્યતિ વિશ્વરૂપમ્ ।
વાચા તથૈવ ન વદેન્મમ સૌમ્યવાણીં તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૭॥

સત્ત્વં ન મે મનસિ યાતિ રજસ્તમોભ્યાં વિદ્ધે તદા કથમહો શુભકર્મવાર્તા ।
સાક્ષાત્પરંપરતયા સુખસાધનં તત્તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૮॥

પૂજા કૃતા ન હિ કદાઽપિ મયા ત્વદીયા મન્ત્રં ત્વદીયમપિ મે ન જપેદ્રસજ્ઞા ।
ચિત્તં ન મે સ્મરતિ તે ચરણૌ હ્યવાપ્ય તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૯॥

યજ્ઞો ન મેઽસ્તિ હુતિદાનદયાદિ યુક્તો જ્ઞાનસ્ય સાધનગણો ન વિવેકમુખ્યઃ ।

જ્ઞાનં ક્વ સાધનગણેન વિના ક્વ મોક્ષસ્તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૦॥

સત્સંગતિર્હિ વિદિતા તવ ભક્તિહેતુઃ સાઽપ્યદ્ય નાસ્તિ બત પંડિતમાનિનો મે ।
તામન્તરેણ ન હિ સા ક્વ ચ બોધવાર્તા તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૧॥

દૃષ્ટિર્ન ભૂતવિષયા સમતાભિધાના વૈષમ્યમેવ તદિયં વિષયીકરોતિ ।
શાન્તિઃ કુતો મમ ભવેત્સમતા ન ચેત્સ્યાત્તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૨॥

મૈત્રી સમેષુ ન ચ મેઽસ્તિ કદાપિ નાથ દીને તથા ન કરુણા મુદિતા ચ પુણ્યે ।
પાપેઽનુપેક્ષણવતો મમ મુત્કથં સ્યાત્તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૩॥

નેત્રાદિકં મમ બહિર્વિષયેષુ સક્તં નાન્તર્મુખં ભવતિ તામવિહાય તસ્ય ।
ક્વાન્તર્મુખત્વમપહાય સુખસ્ય વાર્તા તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૪॥

ત્યક્તં ગૃહાદ્યપિ મયા ભવતાપશાન્ત્યૈ નાસીદસૌ હૃતહૃદો મમ માયયા તે ।
સા ચાધુના કિમુ વિધાસ્યતિ નેતિ જાને તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૫॥

પ્રાપ્તા ધનં ગૃહકુટુમ્બગજાશ્વદારા રાજ્યં યદૈહિકમથેન્દ્રપુરશ્ચ નાથ ।
સર્વં વિનશ્વરમિદં ન ફલાય કસ્મૈ તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૬॥

પ્રાણાન્નિરુધ્ય વિધિના ન કૃતો હિ યોગો યોગં વિનાઽસ્તિ મનસઃ સ્થિરતા કુતો મે ।
તાં વૈ વિના મમ ન ચેતસિ શાન્તિવાર્તા તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૭॥

જ્ઞાનં યથા મમ ભવેત્કૃપયા ગુરૂણાં સેવાં તથા ન વિધિનાઽકરવં હિ તેષામ્ ।
સેવાઽપિ સાધનતયા વિદિતાસ્તિ ચિત્તે તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૮॥

તીર્થાદિસેવનમહાવિધિના હિ નાથ નાકારિ યેન મનસો મમ શોધનં સ્યાત્ ।
શુદ્ધિં વિના ન મનસોઽવગમાપવર્ગૌ તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૧૯॥

વેદાન્તશીલનમપિ પ્રમિતિં કરોતિ બ્રહ્માત્મનઃ પ્રમિતિસાધનસંયુતસ્ય ।
નૈવાઽસ્તિ સાધનલવો મયિ નાથ તસ્યાસ્તસ્માત્ત્વમદ્યશરણં મમ દીનબન્ધો ॥ ૨૦॥

ગોવિન્દ શંકર હરે ગિરિજેશ મેશ શમ્ભો જનાર્દન ગિરીશ મુકુન્દ સામ્બ ।
નાન્યા ગતિર્મમ કથંચન વાં વિહાય તસ્માત્પ્રભો મમ ગતિઃ કૃપયા વિધેયા ॥ ૨૧॥

એતત્સ્તવં ભગવદાશ્રયણાભિધાનં યે માનવાઃ પ્રતિદિનં પ્રણતાઃ પઠન્તિ ।
તે માનવા ભવરતિં પરિભૂય શાન્તિં ગચ્છન્તિ કિં ચ પરમાત્મનિ ભક્તિમદ્ધા ॥ ૨૨॥

ઇતિ શ્રીમન્મૌક્તિકરામોદાસીનશિષ્યબ્રહ્માનન્દવિરચિતં ભગવચ્છરણસ્તોત્રં સમ્પૂર્ણમ્॥

*Bhagavat Sharanastotram*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*